वाक्यपदीयोक्तः कर्मप्रपञ्चः

मिलन-मालिकः *

Abstract

[षण्णां कारकाणां मध्ये अन्यतमत्वं भजते कर्मकारम् । कर्मणः स्वरूपं किम् एवञ्च तस्य प्रकाराः के इत्ययं विचारः मदीयशोधप्रबन्धस्य विषयतामेति । सामान्यतः कर्म तावत् प्राधान्येन द्विविधमिति वक्तुं शक्यते । ईप्सितं कर्म, अनीप्सितं कर्म चेति । तत्र ईप्सितकर्मणः त्रयः भेदाः विद्यन्ते । निर्वर्त्यं विकार्यं प्राप्यञ्चेति त्रिविधम् ईप्सितकर्म । अनीप्सितकर्मणोऽपि चत्वारः प्रकाराः भवन्ति । औदासीन्येन प्राप्यम्, अनीप्सितम्, संज्ञान्तरैरनाख्यातम्, अन्यपूर्वकम् चेति चतुर्विधम् अनीप्सितं कर्म । एवञ्च आहत्य सप्त प्रभेदाः भवन्ति कर्मणः । भगवता भर्तृहरिणा विरचिते "वाक्यपदीयम्" इति ग्रन्थे एतत् सर्वं सूक्ष्मरूपेण आलोचितं वर्तते । अतः तस्य ग्रन्थस्य आधारेण कर्मकारकस्य स्वरूपं तस्य भेदाश्च इति विषयः प्रबन्धेऽस्मिन् यथामति आलोच्यते ।]

कुञ्चिकाशब्दाः— कर्म, कर्मप्रकारः, सम्बन्धः, ईप्सितम्, अनीप्सितम्

कर्मसंज्ञाविधायकं प्रधानं सूत्रम् "कर्तुरीप्सिततमं कर्म" [अष्टाध्यायी १.४.४९] इति । कर्ता स्वक्रियया यं सम्बद्धुमिच्छति सः कारकसंज्ञः सन् कर्मसंज्ञकः भवति इति तदर्थः । कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्[१] इत्युक्तं भट्टोजिदीक्षितैः । क्रियायाः व्यापारेण कर्तुः यत् इष्टतमं तस्य कर्म इति संज्ञा भवति । कर्तुः इष्टतम : पदार्थः इत्युक्ते सः यं कर्ता क्रियया प्रकर्षेण प्राप्तुम् इच्छति । उदाहरणं यथा—चैत्रः ओदनं खादति इति । अत्र वाक्ये कर्ता चैत्रः । सः खादनक्रियया ओदनं स्वक्रियाजन्यफलस्य गलविलाधःसंयोगस्य आश्रयत्वेन व्याप्तुम् इच्छति अतः ओदनस्य कर्मसंज्ञा भवति । भगवता भर्तृहरिणा तु वाक्यपदीये कर्मणः सप्त प्रकाराः प्रदर्शिताः । तथाहि—

> निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
> तत्रेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम् ॥ इति ।
>
> [वाक्यपदीयम् ३.७.४५]

---

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु ; Email : milanmalikrkmvu@gmail.com

१ वैयाकरणसिद्धान्तकौमुद्याम् ५६४ सूत्रस्य वृत्तिः ।

अस्मिन् श्लोके द्विविधं कर्म उक्तम् ईप्सितम् अनीप्सितं चेति । तत्र ईप्सिततमं कर्म इत्यनेन "कर्तुरीप्सिततमं कर्म" इति सूत्रविहितं कर्म उच्यते । तस्य च त्रयः भेदाः—निर्वर्त्यम्, विकार्यम्, प्राप्यम् चेति । अनीप्सितं कर्म चतुर्थपादे "अन्यत् तु" इत्यनेन उक्तम् । "अकथितं च" [अष्टाध्यायी १.४.५१] इत्यादिभिः सूत्रान्तरैः निर्दिष्टं कर्म अनीप्सितम् ।

ततः अनीप्सितकर्मणः भेदाः प्रदर्श्यन्ते—

औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चान्यपूर्वकम् ॥ इति ।

[वाक्यपदीयम् ३.७.४६]

ईप्सितभिन्नम् अनीप्सितम् । तस्य चत्वारः भेदाः—औदासीन्येन प्राप्यम्, कर्तुरनीप्सितं [द्वेष्यम्], संज्ञान्तरैः अनाख्यातम्, अन्यपूर्वकम् चेति ।

एवं साकल्येन कर्मणः सप्त भेदाः । ते एकैकशः निरूप्यन्ते-

निर्वर्त्यं कर्म

क्रियया निष्पाद्यं निर्वर्त्यं कर्म । तथा हि उच्यते—

सती वाऽविद्यमाना वा, प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥ इति ।

[वाक्यपदीयम् ३.७.४७]

श्लोकस्य अन्वयः— यस्य सती वा अविद्यमाना वा परिणामिनी प्रकृतिः न आश्रीयते, तस्य (कर्मकारकस्य) निर्वर्त्यत्वं प्रचक्षते ।

अत्र प्रकृतिः = उपादानकारणम्,[२] आश्रीयते = विवक्ष्यते, प्रचक्षते = वदन्ति इत्यर्थः ।

अयं भावः— यस्य कारकस्य निष्पाद्यमानस्य कारणं विद्यमानम् अविद्यमानं वा परिणमते, किन्तु अभेदेन न विवक्ष्यते तत् निर्वर्त्यं कर्म ।

सती वा प्रकृतिः परिणमते इत्यस्य उदाहरणम्—मृदा घटं करोति इति । घटोत्पत्तेः पूर्वं विद्यमाना मृत् घटरूपेण परिणमते । अत्र मृत् साधनं कारणभूता घटः कर्म कार्यभूतम् । कारणस्य अत्र कार्येण अभेदविवक्षा नास्ति । तस्यायं भावः—यदा कार्यकारणयोः भेदविवक्षा तदा कारणस्य पूर्वसिद्धत्वे अपि कार्यस्य निष्पाद्यमानत्वात् तत् निर्वर्त्यं कर्म । यत्र तु मृद् एव विक्रियते इति विवक्षा तत्र प्रकृतेः विकृत्या सह अभेदः विवक्षा, यथा "मृदं

[२] वाक्यपदीये साधनसमुद्देशे ४७ कारिकायाः "अम्बाकर्त्री" इति व्याख्या ।

घटं करोति" इत्यादि । अभेदविवक्षायां तत् विकार्यं कर्म स्यात्, प्रकृतिरूपेण पूर्वसिद्धत्वात् ।

अविद्यमाना वा प्रकृतिः परिणमते— शब्दः संयोगं जनयति । यदा शब्दः श्रूयते तदा कर्णे शब्दः अभिहन्ति । स एव शब्द-कर्णयोः संयोगः । अत्र संयोगे कारणं शब्दः । स च संयोगात् पूर्वं न श्रूयते, अनभिव्यक्तः वर्तते । इदम् अनभिव्यक्तत्वम् एव अविद्यमानत्वम् इत्युक्तं श्लोके न तु स्वरूपतः अनवस्थितत्वम् ।

एवमेव शब्दस्य संयोगादिः कारणम् इति पक्षेऽपि वेदितव्यम् । संयोगादिः इत्यत्र आदिना विभागः ग्राह्यः । कण्ठताल्वादिषु वायोः संयोगेन शब्दः उत्पद्यते । अत्र शब्दः कार्यम्, संयोगः कारणम् । वंशस्य दलद्वयविभागेन यत्र शब्दः उत्पद्यते तत्र विभागः कारणम् । अतः संयोगः विभागश्च शब्दस्य प्रकृतिः ।[३]

विकार्यं कर्म

यदा प्रकृतेः उपादानकारणस्य अभेदेन परिणामत्वेन विवक्षा तदा तद् विकार्यं कर्म भवति । तथाहि उक्तम्—

प्रकृतेस्तु विवक्षायां विकार्यम्... इति ।

[वाक्यपदीयम् ३.७.४८]

अत्र उदाहरणं यथा—मृदं घटं करोति, काशान् कटं करोति इत्यादि । अत्र प्रकृतेः मृदादेः अभेदेन घटाकारेण विवक्षा । अतः घटः विकार्यं कर्म ।

विकार्यं कर्म च प्रकृत्युच्छेदेन तथा गुणान्तरोत्पत्त्या द्वेधा व्यवस्थितम् ।

प्रकृत्युच्छेदसंभूतं किञ्चित्काष्ठादिभस्मवत् ।
किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥ इति ।

[वाक्यपदीयम् ३.७.५०]

प्रकृतेः उच्छेदः नाम निरन्वयविनाशः, ततः सम्भूतं विकार्यं कर्म । तत्र दृष्टान्तः उच्यते—काष्ठादिभस्मवदिति । काष्ठानि भस्म करोति इत्यादौ काष्ठादिरूपायाः प्रकृतेः विकारभूतं भस्म करोत्यादेः विकार्यं कर्म । सती वाऽविद्यमाना वा इति पूर्वलक्षणेन प्रकृतेः अविवक्षायां निर्वर्त्यं कर्म, प्रकृतिविवक्षायां विकार्यं कर्म । परन्तु प्रकृतलक्षणेन तु प्रकृतेः अविवक्षायाम् अपि तद् विकार्यं कर्म । यतो हि तत्र काष्ठादिकम् उपमृद्य भस्म

[३] वाक्यपदीये साधनसमुद्देशे ४७ कारिकायाः "अम्बाकर्त्री" इति व्याख्या ।

उपजातमिति । अपि च पूर्वलक्षणे प्रकृतिः साक्षाद् विकार्यं कर्म तदभेदेन विकारोऽपि, द्वितीयलक्षणे तु प्रकृतेः अविवक्षायां साक्षाद् विकारः एव विकार्यं कर्म इति विशेषः । ततः गुणान्तरोत्पत्त्या विकार्यं कर्म उच्यते । गुणान्तरस्य सन्निवेशादेर्धर्मस्य उत्पत्त्या उपलक्षितं कर्म विकार्यम् । यथा—सुवर्णं कुण्डले भवतः । अत्र तु सुवर्णस्य आकृतिगतविकारः लक्ष्यते न तु निरन्वयविनाशः इति ।

प्राप्यं कर्म

प्राप्यकर्मणः लक्षणं हि—

क्रियाकृता विशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत्प्राप्यं इति कथ्यते ॥ इति ।

[वाक्यपदीयम् ३.७.५१]

दर्शनात् प्रत्यक्षात् । सिद्धिः इत्यस्य निश्चयः इत्यर्थः । प्रत्यक्षात् अनुमानाद्वा क्रियाकृतविशेषाणां निश्चयः यत्र न जायते तत् प्राप्यं कर्म । यथा—"ग्रामं गच्छति, वनं पश्यति" इति । अत्र गते अगते वा ग्रामे गमनक्रियाकृतं वैलक्षण्यं नानुभूयते । एवमेव दृष्टे अदृष्टे वा वने दर्शनक्रियाकृतं वैजात्यं न दृश्यते न चानुमीयते । अतः ग्रामः वनं च प्राप्यकर्मणी । परन्तु "ग्रामं दहति, वनं छिनत्ति" इत्यत्र तु ग्रामवने न प्राप्यकर्मणी न भवतः । यतो हि दग्धे अदग्धे च ग्रामे एवं छिन्ने अछिन्ने च वने रूपतः विशेषोपलम्भः भवत्येव ।

औदासीन्येन प्राप्यं कर्म

औदासीन्यम् नाम उदासीनभावः । यत् कर्तुः क्रियया फलाश्रयत्वेन सम्बद्धुं तु भवति, किञ्च कर्ता तत्र उदासीनः भवति तत् औदासीन्येन प्राप्यं कर्म । औदासीन्येन नाम ताटस्थ्येन । यत्र क्रियाकाले कर्ता उदासीनः कार्यं कुर्वन् अन्यत् किमपि वस्तु अनायासेन स्पृशति पश्यति वा । उदाहरणं यथा ग्रामं गच्छन् तृणं स्पृशति । अत्र कर्तुः गमनक्रियया आनुषङ्गिकरूपेण तृणस्य स्पर्शः भवति । कर्ता ग्रामं गच्छन् पथि विद्यामानं तृणम् अपि स्पृशति । अत्र कर्तुः मुख्योद्देश्यं भवति ग्रामप्राप्तिः, न तु तृणस्पर्शः ।

अनीप्सितं (द्वेष्यं) कर्म

कर्ता स्वक्रियया यद् सम्बद्धुं नेच्छति परन्तु अनिष्टं सदपि सम्बद्धुं

भवति, तद् अनीप्सितं (द्वेष्यं) कर्म । उदाहरणं यथा—ओदनं भुञ्जानो विषं भुङ्क्ते । अत्र कर्तुः ईप्सितं कर्म अस्ति ओदनः । अत्र अनिच्छन्नपि अजानन् बलाद् वा विषं भुङ्क्ते । एवञ्च विषसम्बद्धं फलं मरणं द्वेष्यं तथापि क्रियया सह सम्बद्धम् । अतः अनीप्सितस्यापि विषस्य "तथायुक्तं चानीप्सितम्" [अष्टाध्यायी १.४.५०] इत्यनेन सूत्रेण तस्य कर्मसंज्ञा भवति ।

संज्ञान्तरैरनाख्यातं कर्म

संज्ञान्तरैः = अपादानादिभिः । अनाख्यातम् = अकथितम् । यत्र अपादानादिविशेषसंज्ञानां निमित्तानि विद्यन्ते, परन्तु वक्ता ताः संज्ञाः न विवक्ष्यन्ते तत्र "अकथितञ्च" [अष्टाध्यायी १.४.५१] इत्यनेन सूत्रेण कर्मसंज्ञा भवति । तत्कर्म संज्ञान्तरैरनाख्यातम् इति । उदाहरणं यथा—गां पयः दोग्धि । अत्र ईप्सितं कर्म पयः एवञ्च अनीप्सितं कर्म भवति गौः । ततः "अकथितञ्च" [अष्टाध्यायी १.४.५१] इत्यनेन सूत्रेण गोः कर्मसंज्ञा भवति । कर्मसंज्ञायां सत्यां "कर्मणि द्वितीया" [अष्टाध्यायी २.३.२] इत्यनेन द्वितीयाविभक्तिः भवति । वस्तुतः अत्र गौः पयसः विभागाश्रयः अतः तस्य "ध्रुवमपायेऽपादानम्" [अष्टाध्यायी १.४.२४] इत्यनेन सूत्रेण अपादानसंज्ञापि भवितुमर्हति । परन्तु कर्तुः अविवक्षया अत्र अपादानसंज्ञा न भवति अपि तु "अकथितञ्च" [अष्टाध्यायी १.४.५१] इत्यनेन सूत्रेण कर्मसंज्ञा इति । यदा तु गोः अपादानत्वेन विवक्षा तदा गोः पयः दोग्धि इत्येव प्रयोगः । तदुक्तं बालमनोरमाकारैः—"अपादानादिविशेषविवक्षायां तु गोर्दोग्धि पयः"[४] इति ।

अन्यपूर्वकं कर्म

अन्यत् कारकं पूर्वं यस्य[५] कर्मणः तत् अन्यपूर्वकं कर्म । अन्यत् = कर्मातिरिक्तं कारकम् । पूर्वम् = पूर्वकालिकम् ।[६] यस्य पूर्वं कर्मभिन्नान्यकारकसंज्ञा आसीत् तत् अन्यपूर्वकं कर्म । उदाहरणं यथा—देवदत्तम् अभिक्रुध्यति इति । क्रुध् तथा द्रुह् धात्वोः प्रयोगे यं प्रति कोपः तस्य "क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः" [अष्टाध्यायी १.४.३७] इत्यनेन सूत्रेण सम्प्रदानसंज्ञा पूर्वं विहिता । तां प्रबाध्य सोपसर्गस्य क्रुध् तथा द्रुह् धातोः

[४] वैयाकरणसिद्धान्तकौमुद्यां "अकथितञ्च" [अष्टाध्यायी १.४.५१] इति सूत्रस्य बालमनोरमाटीका ।

[५] वाक्यपदीये साधनसमुद्देशे ४६ कारिकायाः हेलराजकृत-प्रकाश-टीका ।

[६] वाक्यपदीये साधनसमुद्देशे ४६ कारिकायाः "अम्बाकर्त्री" इति व्याख्या ।

प्रयोगे "यं प्रति कोपः" तस्य "क्रुधद्रुहोरुपसृष्टयोः कर्म" [अष्टाध्यायी १.४.३८] इत्यनेन सूत्रेण कर्मसंज्ञा भवति । अत्र अभि इत्युपसर्गपूवकस्य क्रुध्-धातोः प्रयोगः अस्ति । अतः यं प्रति कोपः तस्य देवदत्तस्य कर्मसंज्ञा भवति । एवमेव अक्षान् दीव्यति इत्यत्रापि "साधकतमं करणम्" [अष्टाध्यायी १.४.४२] इत्यनेन पूर्वसूत्रेण दिवः साधकतमं यत् करणसंज्ञकं तत् "दिवः कर्म च" [अष्टाध्यायी १.४.४३] इत्यनेन कर्मसंज्ञं भवति । तदपि अन्यपूर्वकं कर्म ।

एवं वाक्यपदीयानुसारेण कर्मप्रकाराः इति विषयः यथामति निरूपितः इति शम् ।

✶ ✶ ✶

Bibliography

1. *वाक्यपदीयम्* (तृतीयं काण्डम्) ; भर्तृहरिः ; श्रीहेलराजविरचिताय "प्रकाश"-व्याख्यया "पद्मश्री"पण्डितरघुनाथशर्मणा विरचितया "अम्बाकर्त्री"-व्याख्यया डा. मण्डनमिश्रस्य प्रस्तावनया च समलङ्कृतम् ; द्वितीयो भागः ; डा. हरिश्चन्द्रमणित्रिपाठी (प्रकाशकः), वाराणसी ; सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ; १९९७ (द्वितीयं संस्करणम्) ।
2. *वाक्यपदीयम्* (पदकाण्डे द्वितीयो भागः) ; भर्तृहरिः ; हेलराजकृतप्रकीर्णकप्रकाशसंवलितम् "नारायण"-हिन्दीव्याख्यासंवलितञ्चेति टीकाद्वयोपेतम् ; तृतीयो भागः ; विद्यावाचस्पति प्रो. हरिणारायण तिवारी (सम्पादकः) ; वाराणसी ; चौखम्बा संस्कृत सीरीज आफिस ; २०१५ (प्रथमं संस्करणम्) ।
3. *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा-तत्त्वबोधिनीसहिता) ; प्रथमो भागः ; भट्टोजिदीक्षितः ; गिरिधरशर्मा परमेश्वरानन्दशर्मा च (प्रकाशकौ) ; दिल्ली ; मोतीलाल बनारसीदास ; १९६१ (प्रथमं संस्करणम्) ; २०१४ (पुनर्मुद्रणम्) ।
4. *वैयाकरणसिद्धान्तकौमुदी* ("श्रीधरमुखोल्लासिनी" हिन्दी व्याख्या-समन्विता) ; द्वितीयो भागः ; भट्टोजिदीक्षितः ; श्रीगोविन्दाचार्यः, लक्ष्मीः शर्मा (सम्पादिका) ; वाराणसी ; चौखम्बा सुरभारती प्रकाशन ; २०२४ (पुनर्मुद्रितं संस्करणम्) ।

✳ ✳ ✳